# Brahmana Kritam 09 Shiva Stotram

# ब्रह्मणा कृतं ९ शिवस्तोत्रम्

## Document Information

Text title : Brahmana Kritam 09 Shiva Stotram

File name : brahmaNAkRRitaM09shivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | yuddhakhaNDa | adhyAya 11/12-20||

Latest update : November 19, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 19, 2024

*sanskritdocuments.org*

# ब्रह्मणा कृतं ९ शिवस्तोत्रम्

ब्रह्मोवाच ।
देवदेव महादेव भक्तानुग्रहकारक ।
प्रसीद परमेशान सर्वदेवहितप्रद ॥ १२॥

प्रसीद जगतां नाथ प्रसीदानन्ददायक ।
प्रसीद शङ्कर स्वामिन् प्रसीद परमेश्वर ॥ १३॥

ॐ काराय नमस्तुभ्यमाकारपरतारक ।
प्रसीद सर्वदेवेश त्रिपुरघ्न महेश्वर ॥ १४॥

नानावाच्याय देवाय वरणप्रिय शङ्कर ।
अगुणाय नमस्तुभ्यं प्रकृतेः पुरुषात्पर ॥ १५॥

निर्विकाराय नित्याय नित्यतृप्ताय भास्वते ।
निरञ्जनाय दिव्याय त्रिगुणाय नमोऽस्तु ते ॥ १६॥

सगुणाय नमस्तुभ्यं स्वर्गेशाय नमोऽस्तु ते ।
सदाशिवाय शान्ताय महेशाय पिनाकिने ॥ १७॥

सर्वज्ञाय शरण्याय सद्योजाताय ते नमः ।
वामदेवाय रुद्राय तदाप्यपुरुषाय च ॥ १८॥

अघोराय सुसेव्याय भक्ताधीनाय ते नमः ।
ईशानाय वरेण्याय भक्तानन्दप्रदायिने ॥ १९॥

रक्ष रक्ष महादेव भीतान्नस्सकलामरान् ।
दग्ध्वा च त्रिपुरं सर्वे कृतार्था अमराः कृताः ॥ ५.११.२०॥

स्तुत्वैवं देवतास्सर्वा नमस्कारं पृथक्पृथक् ।
चक्रुस्ते परमप्रीता ब्रह्माद्यास्तु सदाशिवम् ॥ २१॥

इति शिवपुराणे रुद्रसंहितायां युद्धखण्डे

एकादशाध्यायान्तर्गतं ब्रह्मणा कृतं शिवस्तोत्रं
समाप्तम् ।

शिवपुराण । रुद्रसंहिता । युद्धखण्ड । अध्याय ११/१२-२०॥

shivapurANa . rudrasaMhitA . yuddhakhaNDa . adhyAya 11/12-20..

Proofread by PSA Easwaran

*Brahmana Kritam 09 Shiva Stotram*

pdf was typeset on November 19, 2024

Please send corrections to *sanskrit@cheerful.com*